मालतीकुष्ठं वृहती च हरीतकी। एतेषां पाणिकैर्भागैः शेषास्तु कार्षिकाः स्मृताः। पिप्पल्योऽथ विड़ङ्गानि सैन्धवं शर्करा वचा। सर्वमेतत् समालोड्य शनैर्मृदग्निना पचेत्। एतत् प्राशितमात्रेण वाग्विशुद्धिः प्रजायते। सप्तरात्रप्रयोगेण किन्नरैः सह गीयते। अर्द्धरात्रप्रयोगेण स्वरो भवति कोकिलः। मासमेकं प्रयोगेण भवेत् श्रुतिधरो नरः। पञ्च गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत्। बन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम्। घृतं सारस्वतं नाम बलवर्णवपुःप्रदम्" चिकित्सारत्नसंग्रहः।

ब्र(व्र)ह्मेशय ब्रह्मणि तपसि शेते शी—अच् पृषो०। १कार्त्तिकेये भा०व० २३१ अ०। २विष्णौ च भा०शा०३४०अ०।

ब्र(व्र)ह्मोज्झ पु० ब्रह्म वेदमुज्झति उज्झ—त्यागे अण् उप० स०। वेदत्यागिनि "ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्" मनुना तत्त्यागस्यानुपातकत्वमुक्तम्।

ब्र(व्र)ह्मोड़(दु)म्बर न० तीर्थभेदे भा० व० ८३ अ०।

ब्र(व्र)ह्मोत्तर त्रि० ब्रह्मा ब्राह्मणः उत्तरोऽधिकारी यस्य। ब्रह्मस्वामिके भूम्यादौ। २ब्रह्मप्रधाने च।

ब्र(व्र)ह्मोद्य न० वद—भावे क्यप् वृत०। ब्रह्मप्रतिपादकवाक्ये कात्या० श्रौ० १२।४।२०। २ब्रह्मकथने च "ब्राह्मणा भगवन्तो हन्ताहमिमं (याज्ञ्यम्) द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चित् ब्रह्मोद्यम् जेतेति" वृ० उ०।

ब्र(व्र)ह्मोपनेतृ पु० ब्रह्माणं विप्रमुपनयते तद्धेतुदण्डहेतुत्वात् उप—नी—तृच्। पलाशवृक्षे "विप्रस्य पालाशो दण्डः" स्मृतिः।

ब्र(व्र)ह्मोपनिषद् स्त्री उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

ब्र(व्र)ह्मौदन पुंन० ब्रह्मार्थमोदनम्। यज्ञे ऋत्विग्भेदार्थे चरौ। "ब्रह्मौदनं पचति चतुर्णां पात्राणामञ्जलिप्रसृतानाञ्च" कात्या०श्रौ० २०।१।४। "चतुर्णां पात्राणां चतुर्णामञ्जलीनां चतुर्णां प्रसृतानां च प्रसृतस्यैकाङ्गुलिकोशः। "अन्तैनमाद्यत्विग्भ्यः प्रयच्छति" ५सू०। "एनमोदनम्" कर्कः।

ब्रा(व्रा)ह्म न०ब्रह्मण इदम्, तेन प्रोक्तम् वा अण् टिलोपः। १अङ्गुष्ठमूले तीर्थे, तेन हि तीर्थेन द्विजाचमनं विहितमिति तस्य तत्सम्बन्धित्वम् "प्राग्वा ब्रा(व्रा)ह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" इति मनुः। "अङ्गुष्ठोत्तरतो रेखा या पार्श्वेर्दक्षिणस्य च। एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै" स्मृतिः। २नारदे पु०जटा०। ब्र(व्र)ह्मणोक्ते अष्टादशपुराणान्तर्गते ३महापुराणभेदे न०। ४विवाहभेदे ५पारदे च पु०। ६सरस्वत्यां तदधिष्ठातृकायां ७वाचि ८सोमलतायां ९ब्रह्मीशाके (वामनहाटि) शाकभेदे च स्त्री। "आवृत्तानां गुरुकुलात् विप्राणां पूजको भवेत्। नृपाणामक्षयो ह्येष ब्राह्मो धर्मो विधीयते" इति मनूक्ते राज्ञां १०धर्मभेदे पु०। ११मातृभेदे स्त्री ङीप्। "ब्राह्मी नारायणी तथेति" कालकवचम्। "वृहदस्याः शरीरं यदप्रमेयं प्रमाणतः। वृहद्विस्तीर्णमित्युक्तं ब्राह्मी देवी ततः स्मृता देवीपु० उक्तनिर्वचनायां १२देव्याञ्च स्त्री १३ब्रह्मसम्बन्धिनिमात्रे त्रि० स्त्रियां ङीप् "एषा ब्राह्मी स्थितिः पार्थ!" गीता। सरस्वत्या ब्रह्मजातत्वं च ब्रह्माणीशब्दे दर्शितं तत्र दृश्यम्। "ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च शीतला। कषाया मधुरा स्वादुपाकायुष्या रसायनी। स्वर्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्। विषशोथज्वरहरी तद्वन्मण्डूकपर्ण्यपि" भावप्र० ब्राह्मीशाकस्य गुणा उक्ताः। १४वाराहीकन्दे १५हिलमोचिकायां स्त्री राजनि०। १६रोहिण्यां स्त्री १७नक्षत्रे न० तयोर्ब्रह्माधिष्ठातृदेवताकत्वात् तथात्वं "रात्रेश्च पश्चिमे भागे मुहूर्त्तो ब्राह्म उच्यते" पितामहोक्ते रात्रिशेषयामार्द्धस्थिते अरुणोदयकालात् प्रागदण्डद्वयात्मके १८ काले पु० १९ब्रह्मसम्बन्धिदिने २०तन्माने च अहन्शब्दे दृश्यम्।

ब्रा(व्र)ह्मक त्रि० ब्रह्मणा कृतं कुलालादि०वुञ्। विप्रेण कृते।

ब्रा(व्र)ह्मगुप्त पु० आयुधजातिवर्गभेदे त्रिगर्त्तषष्ठशब्दे दृश्यम् स वर्गो येषां त्रिगर्त्ता० स्वार्थे छ। ब्राह्मगुप्तीय तत्रार्थे।

ब्रा(व्रा)ह्मण पुंस्त्री० ब्रह्म वेदं शुद्धं चैतन्यं वा वेत्त्यधीते वा अण् "ब्रह्मणो जाताविति" पा० न टिलोपः ब्रह्मणो मुखजातत्वात् ब्रह्मणोऽपत्यम् वा अण्। १विप्रे जातिभेदे स्त्रियां जातित्वात् ङीष्। २पृक्कायां स्त्री ङीप्। "ब्रह्म जानाति ब्राह्मणः" इत्युक्ते ३परब्रह्मज्ञे त्रि०। ब्राह्मणचेतने ब्राह्मणाज्जातदेहे तत्सङ्कल्पजातदेहे च ब्राह्मणत्वजातिः स्वीक्रियते यथा गोमयवृश्चिको भयजातदेहस्य वृश्चिकत्वं तद्वत्। तत्र सङ्कल्पजाते देहे ब्राह्मणत्वं यथा नारदद्रोणादौ। इदानीन्तु ब्राह्मणस्य सत्यसंकल्पत्वाभावान्न तथात्वम्। किञ्च कलौ असवर्णाविवाहनिषेधादपि न तथात्वम्।